श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ क्षेमकारिशतकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ क्षेमकारिशतकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

## अथ प्रथमः महाप्रासविहारः

श्रीलक्ष्मीसदने स्थितिं कलयते श्रीपक्षिराजाय ते
श्रीलक्ष्मीभगवद्विवाहविधये हेतुत्वमातस्थुषे।
श्रीलक्ष्मीभगवत्सुवाहमणये वेदौघपूर्णात्मने
श्रीलक्ष्मीसदनादिवाञ्छितवरान् सद्यः प्रदात्रे नमः॥ 1 ॥

अमृतकलशसिन्धोरन्तरङ्गे शयानं
अमृतकलशसिन्धोः कन्यकामुद्वहन्तम्।
अमृतकलशसिन्धुं कञ्चिदंसे वहन्तं
अमृतकलशहस्तं भावये पक्षिराजम्॥ 2 ॥

पाकशासनशिलामयाकृते !
पाकशासनसहोदरप्रिय !।
पाकशासन ! दिशेह पक्षिणां
पाकमस्य कवितासु कञ्चन॥ 3 ॥

कलशजलधिकन्यागेहगेहे लसन्तं
कलशजलधिकन्याकान्तकान्तं वहन्तम्।
कलशममृतपूर्णं हस्तपद्मे दधानं
कलशजलधिकन्यावीक्षितं सन्नमामि॥ 4 ॥

पद्मालयेऽतिमधुरे कृतनित्यवासः
पद्माभिराममधुनाशनक्लृप्तचित्तः।
पद्माभिजातशुभवाहनहंससेव्यः
पद्मासितेक्षणनिभः परिपातु पत्री ॥ 5 ॥

जगन्मातुर्गेहे नगरतिलके पूर्णविभवे
जगन्मातुर्गेहं भुजयुगलमध्यं निजमयम्।
जगन्माता कृष्णाजिनपिहितमाहो ! स कलयन्
जगन्मानं दृष्ट्वा पतगपतिमानन्दमयते ॥ 6 ॥

आश्लेषातारदेवान् हृदि भयभरितान् सन्ततं कुर्वतस्तान्
आश्लेषादात्मदारद्वयकरकलितादादिमूलस्य पुंसः।
आश्लेषादूरुजातादधिगतमहितानन्दयोगस्य वीन्दोः
आश्लेषं बुद्धिरेषा मम समधिगता मोहमंहो ! प्रयाति ॥ 7 ॥

कमलस्थितदेवतागृहे
कमलश्रीहरिनेत्रवाहनम्।
कमलं कलयन्तमाश्रये
कमलश्रीकरसूतसोदरम् ॥ 8 ॥

पद्मं कर्णे वहति स भवान् पद्मनाभं तथांसे
पद्मं कर्णे पतगनृपते ! तं महान्तं परस्मिन्।
पद्मागारस्त्वमिति यदतस्स्वानुरूपे पवित्रे
पद्मागारे ननु पुरवरे सादरो वर्तसेऽस्मिन् ॥ 9 ॥

कमठं करटिं च भक्षयन्
कमलं हन्त ! सतां विवर्धयन्।
कमलालयभूषणं स मे
कमलाकान्तधरः करोतु शम् ॥ 10 ॥

सूरसं सरसिजालयवत्या
सूरसं च तत एव जगत्याम्।
सूरसन्नयनमत्र वहन्तं
सूरसारथिसहोदरं भजे॥ 11 ॥

पक्षीन्द्र ! रक्षेति वदन्ति लोकाः
पक्षीन्द्र ! पश्येति वदन्ति केचित्।
पक्षीन्द्रलक्षीकृतभक्तिभावः
पक्षीकृतो रक्षसि भव्यशब्दः॥ 12 ॥

## अथ द्वितीयः प्रासविहारः

रक्षसस्तनुभवेन पातितं
रक्षतस्तव तदा रघूद्वहम्।
पक्षपातविभवोऽस्तु तादृशः
स क्षणाय पतगेन्द्र ! मे सदा॥ 13 ॥

शिलामयी ते तनुरत्र पक्षिन् !
कलापिकान्ता कवचोज्ज्वलेयम्।
मलानि मन्नेत्रगतानि नित्यं
विलासलेशेन विनाकरोतु॥ 14 ॥

अंसाश्रयं कञ्चन कालमेघं
कंसान्तकं रञ्जयतो निनादैः।
शंसास्पदं विक्रमवैखरी सा
ध्वंसाय भूयादघसन्ततेर्नः॥ 15 ॥

फणितिभिरमलाभिरुत्थिताङ्गः
मणिरभिपातु स पक्षिणामयं नः।

गुणिवरपुरुषोत्तमस्य वाहः
    फणिरमणीरमणीयतानिरासः ॥ **16** ॥

पक्षिराज ! भव मेऽक्षिगोचरः
    भक्षितोरग ! शुभक्षिताविह।
रक्षितानघमुनीश्वर ! प्रभो !
    शिक्षितामितदनूदितोत्तम ! ॥ **17** ॥

वरुणालयजागृहे स्थितं
    तरुणा स्वर्गसदां समक्रमम्।
अरुणावरजं तमाश्रये
    करुणापूरितशुद्धमानसम् ॥ **18** ॥

मरुणा भवनामधारिणा
    गुरुणा तप्तममुं जनं भृशम्।
वरुणालयजागृहेऽर्चितः
    करुणानिर्वृतमातनोतु माम् ॥ **19** ॥

पयोधिकन्याभवने वसन्तं
    वयोधिकं कञ्चन भावयामि।
रयोत्तरं वेदमयं यमाहुः
    जयोदयं येन जना लभन्ते ॥ **20** ॥

नारायणं यो वहते सरागं
    साराधिकं यं सुधियो वदन्ति।
आराधितो यस्सदने रमायाः
    पारायणं तस्य करोमि नाम्नाम् ॥ **21** ॥

पयोधिकन्यासदने विभान्तं
    वयोधिकं कञ्चन भावयामि।

अयोधिको येन भवेद्भवेऽस्मिन्
  भयोदयः कोऽपि कदाऽपि न स्यात्॥ 22 ॥

वातस्य जेतुर्विहगेश्वरस्य
  तातस्य वाचा करिकूर्मभोक्तुः।
यातस्य नाकं त्वमृतापहर्तुः
  मा तस्य कोऽप्यस्ति समो जगत्याम्॥ 23 ॥

कारागृहान्तः कलितावतारं
  वाराणसीदाहकचक्रपाणिम्।
धाराधरं कञ्चन संवहन्तं
  साराधिकं पक्षिपतिं प्रपद्ये॥ 24 ॥

कारागृहान्तर्जनिमाप्तवन्तं
  धाराधरं स्वांसगतं वितन्वन्।
कारागृहान्मां भवनामधेयात्
  वीराजराड् विष्णुपदे विधत्ताम्॥ 25 ॥

वश्यो विष्णुर्यस्य गुणौघैः
  नश्यत्यंहो यस्य दृशा नः।
भ्रश्यन्त्यसवो येनाहीनां
  पश्यत्वस्मानेष कटाक्षैः॥ 26 ॥

वञ्जुलवल्लीनायकवाहं
  अञ्जनसंमितविग्रहवर्णम्।
मञ्जुलराजतकवचं वन्दे
  रञ्जितसेवकमानसनेत्रम्॥ 27 ॥

## अथ तृतीयः अनुप्रासविहारः

परस्य पुंसः प्रणयैकपात्रं
पयोधिजापत्तनक्लृप्तवासः।
पदोदरप्राणगणापहारी
पतङ्गराजः परितस्स पातु॥ 28॥

पदे पयोधेः प्रियकन्यकायाः
पदाब्जसञ्चारपवित्रितेऽस्मिन्।
पदोदरामोदविहारहारी
पदे पदे सम्पदमातनोतु॥ 29॥

पद्मानिवाससदनः परमस्य वाहः
पक्षानिलक्षपितपन्नगराजराजिः।
पाकारिसैन्यपरिभावुकवीर्यलेशः
पथ्यानि मे दिशतु पत्त्ररथावतंसः॥ 30॥

पातालान्तः प्रविष्टो भयभरमधिकं वर्धयन् पन्नगानां
पद्माकान्तं वहन् तं पथि सति मरुतां पश्यतामक्षिजाते।
पाथो मोदाभिजातं किमपि विगलितं क्षालिताघं वितन्वन्
पद्मासद्माभिरामः पतगपरिबृढः पातु पाषाणवर्ष्मा॥ 31॥

पारम्यस्यैकपात्रं रभसगतिजुषां पन्नगप्राणहारी
पारापेतागमात्मा प्रणतजनमनश्चिन्तितार्थप्रदाता।
पाथोजाक्षस्य वाहः पतगपरिबृढः पातु मां पापबृन्दात्
पारावारात्मजातासदनपुरवरश्रीगृहे राजमानः॥ 32॥

जातो वातोऽनुगन्तुं यमिह गतिपदे नो मनागप्यलं सः
जाये रुद्रासुकीर्ती घटितविघटिते हृष्यतो येन शीघ्रम्।

जालं पापस्य मेऽलं हरतु स भगवानण्डजानां प्रधानो
जानक्यानन्ददश्श्रीरघुकुलजमणेर्जीवितस्य प्रदाता ॥ 33 ॥

उपलवपुषमीडे नायकं पक्षभाजां
उफलमुबलमस्मिन्निन्दिरामन्दिरे नः।
उभललितनिदानं श्रीपवर्गादृताख्यं
कमपि बहुविचित्रं स्वापवर्गप्रदं तम् ॥ 34 ॥

विनतात्मभवो विनतादरवान्
विहृतिं धत्ते तदिदं युक्तम्।
सुरसस्सुतरां सुरसात्मभवान्
हरतीत्येतद् भाति विचित्रम् ॥ 35 ॥

पतङ्गराजः फलदो नतानां
बलिष्ठधुर्यो भगवान् महात्मा।
पवर्गहृद्योऽपि विपापवर्गो
विपापवर्गोऽप्यपवर्गदायी ॥ 36 ॥

विनतानन्दन ! विनतानन्दन !
सुरसाभूहर ! सुरसाभूसुख !।
कमलावेश्मनि कमलावेश्म च
वसता वहता भवताऽस्मि सुखी ॥ 37 ॥

शम्पा रमा यस्य स कालमेघः
शंसत्यजस्रं यमिमं वहन्तम्।
शङ्काकुलं सर्पकुलं स तन्वन्
शन्नश्शकुन्तः परमस्तनोतु ॥ 38 ॥

शकुन्तला यत्कुललालिता सा
शशाङ्कदर्पं मुखतो हरन्ती।

शशाङ्कवंशस्य ददौ प्रकाशं
    शकुन्तराजस्स तनोतु शं नः ॥ 39 ॥

श्रुतिस्वरूपे त्वयि सन्निविष्टः
    श्रुती निनादैस्सुखयत्युदारैः ।
श्रुत्येकगम्यान् कलयन्नरातीन्
    श्रुत्येकगम्यस्स्वसमान् विधत्ते ॥ 40 ॥

अंसे स्थितस्य पुरुषस्य परस्य कान्त्या
    अम्भोदवत् किमिह भासि शिलागरुत्मन् ! ।
अस्याङ्घ्रिजासरिदुपावृतवत् किमेवं
    अत्रासि तद्रजतकञ्चुकसंवृताङ्गः ॥ 41 ॥

वाराशिकन्यासदनेऽतिमान्यं
    वासं भजन्तं विहगाधिनाथम् ।
वाचां भरैः "देहि -नमामि" हीनैः
    वाहं हरेरन्तरहं वहामि ॥ 42 ॥

शशाङ्कसहजागृहे शमितसर्पलीलारसः
    शठारिमुखसूक्तिभिश्शतश आदरात् कीर्तितः ।
शतक्रतुशरेष्वहो ! शलभतां दिशन् तेजसा
    शमत्र मयि सन्नते शरणमागते पुष्यतु ॥ 43 ॥

शशिभगिनीशरणगतं
    शरणममुं तमहमगाम् ।
शमितमहाफणिललितं
    शतमुखभूशुभविजयम् ॥ 44 ॥

शर्वमौलितटिनीतटनृत्यत्
    शर्वरीशभगिनीशरणस्थम् ।

सर्ववाञ्छितकरं विहगेन्द्रं
सर्वलोकपतिवाहमाश्रये ॥ 45 ॥

सुपर्णं सुशाखं सुरौघाभिनन्द्यं
सुपक्षं सुपृष्ठं सुमेरोस्सपक्षम्।
सुतायास्सुधाब्धेः सुगेहे वसन्तं
सुखं प्राप्तुमाप्तास्सुतं कश्यपस्य ॥ 46 ॥

सरस्वतीभिस्सततं स्थिताभिः
सम्पूर्णसर्वावयवं सुपर्णम्।
सरोजवासासदने वसन्तं
समाश्रये सारसनेत्रवाहम् ॥ 47 ॥

सुरपतिपृतनाधूननपटुना
सुतनोर्विनतासंज्ञावत्याः।
सुत इति जगति प्रथितेनाहं
सुखमिह निखिलं प्राप्तस्सत्यम् ॥ 48 ॥

सुरासुरानन्दितविक्रमौघं
सुकीर्तिलीलारसनिर्वृताङ्गम्।
सुधाब्धिकन्यासदनाङ्गणस्थं
सुतं प्रपद्ये विनताङ्गनायाः ॥ 49 ॥

सुधाम्बुधिसुतागृहे सुरपतेश्चमूत्रासदः
सुधाकलशहारकस्सुमशरस्य वाहः पितुः।
सुधीमणिभिरर्चितस्सुभगनीलमेघप्रभः
सुपर्ण इह मानसे सुखद एतु वासं सदा ॥ 50 ॥

रमारमणवाहनं रणजयश्रिया सेवितं
रवेः रथगसोदरं रघुपतेः रणे रक्षकम्।

रमासदनवासिनं रयजिताञ्जनारञ्जनं
रवेण कृतमङ्गलं रतमना अहं भावये ॥ **51** ॥

शतदलशरणायाः सद्म सम्भूषयन् तं
शतदलकुसुमाक्षं शार्ङ्गपाणिं वहन् नः।
शतमखमणिनीलस्सार्वभौमः खगानां
शतमखसहजातश्रीसुहृत् पातु पापात् ॥ **52** ॥

कल्लोलिनीकामुककन्यकायाः
कान्ते निशान्ते कलयन्निवासम्।
काकोदरत्रासदकूजितो नः
करोतु कं कश्यपपुत्ररत्नम् ॥ **53** ॥

## अथ चतुर्थः चमत्कारविहारः

चक्षुश्श्रुतीनां चरमां दशां य -
न्नासा निजाग्रेण सृजत्यजस्रम्।
स वैनतेयः श्रुतिबृन्दरूपः
श्रुती रुतैस्स्वैः परितः पुनातु ॥ **54** ॥

वटतरुमहाशालालग्नान् मुनीनभिरक्षितुं
गरुड ! भवता क्षुत्क्षुण्णेनाप्यहो ! यदनुष्ठितम्।
तदिह भगवद्भक्तप्रान्ते ममोदितमागसां
निचयमखिलं दूरीकर्तुं चरित्रमलं भृशम् ॥ **55** ॥

उपरो भगवानिह भाति हरिः
कमलासदने स भवान् हि तत्।
उपलाकृतितामधिगत्य परां
उपकाररतिं कुरुते नितराम् ॥ **56** ॥

सौक्ष्म्यात् पश्यति सर्वमत्र परितः श्रीमान् मुनिः कश्यपः
तस्यायं तनयोऽनघो विनतया सत्या स्वकुक्षौ धृतः।
तस्मात् सौक्ष्म्यविलोकनेऽतिनिपुणः श्रीवाहकोऽयं हरेः
सौक्ष्म्यं सौतु मनस्यमुष्य सततं धर्मस्य पक्षीश्वरः॥ **57** ॥

आकाशे किरणैर्नवैस्समुदितैस्सूर्यस्य हेमायिते
वृक्षाग्रैर्मृदुनानिलेन चलितैः संवीजिते चामरैः।
मेघानां शकलैः गतागतियुतैः सम्भूषिते राजतैः
अंसाग्रे कलयन् घनं कमपि तं पक्षीश्वराग्रे भव॥ **58** ॥

यत् पातालगताहिसञ्चयफणासम्भेदि नासाग्रतः
निर्धूतानतपापराशि निगमस्तोमस्य दिव्याकृति।
छन्दोधाम सुधामसारथिमणेर्यद्भ्रातृतामास्थितं
तल्लक्ष्मीसदने समर्चितपदं तेजो ममास्तु श्रियै॥ **59** ॥

सुगन्धगिरिमस्तके मधुरवञ्जुलासंयुतं
विलोचनविनोददं विनमदिष्टसन्दायिनम्।
सदा मनसि सादरं नयनयोश्च कुर्वन् सृतौ
सहस्रनयनोपलाकृतिरयं जयत्यण्डजः॥ **60** ॥

अंसे कंसरिपुं वहन्तममृतं हस्ते प्रशस्तामृतं
नासाग्रेण सदा विभिन्नभुजगं श्रीगेहगेहस्थितम्।
इष्टानानतसञ्चयेषु ददतं तं पक्षिणामीश्वरं
स्वान्ते सन्ततमादरेण कलये वेदौघसद्विग्रहम्॥ **61** ॥

आकाश आस्ते स यदंसदेशे
शाखास्समा यस्य वसन्ति देहे।
पक्षीश्वरोऽयं परमाद्भुतात्मा
करोतु कल्याणपरम्परां नः॥ **62** ॥

कमलाभवने कमनीयतमे
    मणिमुक्ताभिधतटिनीतटगे।
मणिराजनिभं महनीयतमं
    पतगप्रवरं वरदं वरये॥ **63**॥

तुरगान् सवितुर्नयतस्सहजम्
    उदरादुदितं विनतासुतनोः।
उरगानुदरे कलयन्तमहं
    पतगाधिपतिं सततं कलये॥ **64**॥

पक्षी कोऽपि वराक एष वदतु स्वैरं रुतैश्शोभनं
    यद्वाऽशोभनमत्र का नु गणना चिन्ताऽथवा का मम?।
लक्ष्मीमन्दिरमन्दिरेऽतिमहिते सम्पूजिते सन्ततं
    पक्षीन्द्रे त्वयि मङ्गलैकनिलये मन्मानसे जाग्रति॥ **65**॥

"रक्षां पक्षिपते! गजस्य कलयन् अंसे त्वदीये स्थितः
    तेने कर्षणमत्र तत्रभवतः खेदाय किं नाऽभवत्"।
"मोदायैव यदार्तरक्षणकृते वेगोऽस्य मान्यो गुणः
    तेनैवास्य पदाम्बुजेऽस्मि नितरां दास्यं गतो निर्वृतः"॥ **66**॥

प्रालेयाहार्यकन्यापरिबृढधनुषि ज्याविमुक्ते ऋजुत्वं
    प्राप्ते बाणे त्वयाथो पतति भगवतः पादमूले मुरारेः।
भक्ते सक्ते मृदङ्गे नतशिरसि ततो हन्त! गङ्गाधरेऽस्मिन्
    अस्मत्स्वामिन्! गरुत्मन्! त्वमसि यदुपतेः सस्मितप्रेमपात्रम्॥ **67**॥

श्रीमान् वञ्जुलवल्लिकापरिबृढः सौगन्धिकाद्रेः पतिः
    तिष्ठन् श्रीमणिमौक्तिकापरिसरे रम्ये विचित्रेऽत्र वै।
पश्यंस्त्वां चतुराननेन चतुरो वेदान् मुदाधीतिना
    दातुं किं युवयोरुदीतहृदयो बाहुद्वयं तत् दधौ॥ **68**॥

आनीते भवता विरोचनकराद्वाज्ञे किरीटे तदा
मुक्तं मौक्तिकमेकमग्रसरिति श्रीभासुरं मार्गितुम्।
हस्तौ द्वौ प्रसृतौ विधाय सफलौ सञ्छादितुं तन्मणिं
हस्तावेव नहीति किं नु कथयन् स्वामी द्विहस्तोऽभवत्॥ 69॥

उपलाकृतिमुत्पलेन तुल्यं
रजताच्छदभूषिताङ्गजातम्।
नभसा सितमेघजालभाजा
समतामितमाश्रयेऽण्डजातम्॥ 70॥

"त्रयीमूर्तिस्त्वं" मम च स भगवानम्बरमणिः
त्रिधाम्नो धाम त्वं मम च स रथी नाम सदनम्।
तथापि त्वत्प्राप्तौ चकितचकितो धुर्यगुणधीः
इति भ्रात्रा मन्दस्मितमधिगतः पातु खगराट्॥ 71॥

शाखाभङ्गाद्वटपरिहृतिं क्लृप्तवान् किं त्वमेतत्
ज्ञात्वा रुद्रो वटतरुतले नर्तनं संविधत्ते।
यत्राभूवन्नुरगनिवहा निर्भया अङ्गलग्ना
नृत्तानूद्यन्मणियुतफणालोकधूतान्धकाराः॥ 72॥

लक्ष्मीसद्म भवान् वहन् विहरति श्रीमन्! पतङ्गप्रभो!
लक्ष्मीसद्म च सत्त्वदं वहति यत् त्वां तेन विद्योतते।
यस्त्वं नाम वहत्यहो भुवि जनः तं चावहन् यो जनः
लक्ष्मीसद्म स एव सर्वभुवनश्लाघ्यो भवेन्मानवः॥ 73॥

पुराणपुंसो वहनं वितन्वन्
वयोधिकस्सन् विनतात्मजातः।
दृषन्मयो दण्डधरोस्त्यहीनां
स्थितिं गतः क्षीरधिभूगृहान्तः॥ 74॥

सहोदरायास्सदने सुधांशोः
सूर्यस्य सूतस्य सहोदरोऽयम्।
सर्पेन्द्रसन्तानसमाप्तिसाशः
स मे समां सम्पदमातनोतु॥ 75॥

रुद्रेण सत्यं भगिनी हि दत्ता
निजाङ्गभूषागणरक्षणार्थम्।
रुद्रा हि सेयं तव नायिका यत्
विहङ्गराजेति वितर्कयामि॥ 76॥

भुञ्जन् भुजङ्गानुपवीत भूतं
भुक्तौ तु तेषामपवीतभूतम्।
तं ब्रह्मसूत्रं तु समीक्ष्य सर्पं
मन्थानशैलस्मरणं विधत्से॥ 77॥

कार्कोटहारः कबलीकृतानां
कुक्षिस्थितानां भुजगोत्तमानाम्।
आश्वासनार्थं तव नाभिरन्ध्रं
विशन्निवाभाति तदन्तिकास्यः॥ 78॥

चरति गगने त्वय्यंसस्थं विधाय रमाधवं
तपति तपने तच्छत्रत्वं गतस्तव पाणितः।
तव कटकतां यातश्शेषः फणागणविस्तृतः
तव च हृदयं नस्सर्वेषां धिनोति फणीश्वरः॥ 79॥

“स्वामिन्!” “वञ्जुलवल्लि!” “केन भवता नाविष्कृता बाहवः
चत्वारोऽत्र भुजद्वयं पुनरिदं चक्राय शङ्खाय च”।
“कान्ते! भक्ततमो मम प्रियसुहृत् मद्वाहनेन्द्रो वरः
बाहुद्वन्द्वयुतो ममापि तदलं” “स्वामिन्! नमस्ते नमः”॥ 80॥

भुजगाभरणो न धूर्जटिः
    कमलावासगतो न विश्वसृक्।
नवमेघनिभो न माधवः
    क इतीहास्मि न वक्तुमीश्वरः ॥ **81** ॥

कमलालयमातनोत्यधः
    वहते तं कमलालयं नतः।
भुजगाभरणः प्रमोदते
    भुजगान् हन्ति च कोऽन्वयं पुमान् ॥ **82** ॥

भुजगाभरणः कमलालयगो
    नवमेघनिभो यदयं तदयम्।
त्रिभिरपि देवैः स्वयमुदितोऽभूत्
    त्रिभिरपि वेदैः कोऽपि पुमान्नः ॥ **83** ॥

केतुवाहनतयैव मित्रता
    सावयोस्तदिह साप्यहीनता।
तेन शेषफणिराजमित्रता
    वैनतेय ! तव भातु सन्ततम् ॥ **84** ॥

इत्यवेत्य भगवन्मतं स्थितं
    शेषतां वहति शेषवद्भवान्।
शेष एष तव सोऽहमित्यतः
    मामशेषपतगेश्वरोऽवतात् ॥ **85** ॥

भुजान्तरविभूषणं भगवती पयोधेस्सुता
    भवानपि च वाहनं भगवतोऽस्य विष्णोरिति।
वदन् किल पदे पदे वकुलभूषणस्सादरं
    भजत्यमितभक्तिदैः निजवचस्सुधाराशिभिः ॥ **86** ॥

विष्णुं वहन् विष्णुपदैकलोलः
    रुद्रानुकूलः कमलालयेऽपि।
भक्त्या महत्या सततं निविष्टः
    त्रिमूर्तिहृद्यः श्रुतिमूर्तिरिन्धे ॥ 87 ॥

## अथ पञ्चमः प्रार्थनाविहारः

पक्षिराजविनतात्मजसेवा
    विक्षिपत्यघततिं विनतानाम्।
सुक्षितिस्सुकृतभूरिफलानां
    अक्षि मत्सुतमणेः सुखि कुर्यात् ॥ 88 ॥

पक्षिराज ! भुजगेश्वरालये
    भक्षितामितभुजङ्गसन्तते !।
रक्षितानघवटस्थसन्मुने !
    स्वक्षिमद्धरममुं सुतं कुरु ॥ 89 ॥

नेत्रं हि गायत्रमुशन्ति यस्य
    नेत्रं खगानां परमं यमाहुः।
गात्रं यदीयं कनकाभदृश्यं
    नेत्रं स पुत्रस्य सुखीकरोतु ॥ 90 ॥

अक्षौहिणी येन हता सुराणां
    कुक्षौ कृतेभेश्वरकच्छपेन।
स क्षौमसंवीततनुर्गरुत्मान्
    अक्षौघमस्माकमघात् पुनातु ॥ 91 ॥

पक्षीन्द्र ! लक्ष्मीसदनो बलाढ्य !
    पक्षेण निर्धूतविपक्षजात !।

पक्षं मदीयं विजयेन युक्तम्
    अक्षीणधर्मं दयया विधेयाः ॥ 92 ॥

अतिकुटिलगतिस्सन्नात्मनश्छादनार्थं
    विशति किमपि रन्ध्रं हन्त ! वक्त्रेण घोरम्।
वमति विषमपि स्वं सर्वदा गूढवृत्तिः
    विमत इह ममायं शिक्षयेमं खगेन्द्र ! ॥ 93 ॥

पद्मानिधिं वहसि पद्मपलाशनेत्रं
    पद्मानिधौ विहरसे नगरेप्यमुष्मिन्।
पद्मानिधौ मयि विधाय तथा प्रसादं
    पद्माप्तसूतसहजावह सादरत्वम् ॥ 94 ॥

पद्मालये पुरवरे पतगेन्द्र ! तिष्ठन्
    पद्मालयं श्रुतियुगं श्रुतिरूप ! तन्वन्।
पद्मालयं वहसि पद्मपलाशनेत्रं
    पद्मालये मयि च मन्दमतौ प्रसीद ॥ 95 ॥

पदन्यासक्रान्तत्रिभुवनमिमं वेङ्कटपतिं
    "पदन्यासं कुर्या मम करयुगे शेषगिरिराट् !"।
पदान्येवं मन्त्रे परिविरचयन् पत्ररथराट्
    पदं शेषाद्रेर्मे व्रणविरहितं तत् सुखयतु ॥ 96 ॥

श्रीमन् ! पन्नगसार्वभौमनगरे श्रीदेवनाथान्तिके
    नासाग्रेण नदीं हि तादृशरसां यद्वद्भवान् निर्ममे।
तद्वन्मत्सुहृदो हृदो हितरसां वाचं करोतून्नतां
    येनोपैति मुदं मदीयगृहिणी तत्तातपादा अपि ॥ 97 ॥

स्वामिन् ! पक्षीश्वरास्मिन् ! कुरु मयि करुणामीषदेतन्ममालं
    येन स्युस्ते भुजङ्गप्रमुखविषधराः गोचरा नाक्षिमार्गे।

क्षेमो भूयः कुटुम्बे स्वयमतिमहितो वर्धमानो मम स्यात्
श्रीमान्नारायणोऽपि स्वयमतिकुतुकी स्वैर्ममात्के सदा स्यात् ॥ **98** ॥

भुजङ्गपाशं किल मोचयित्वा
भुजायुगीपञ्जरगः खरारेः।
भुजा स्वतुण्डेन भुजङ्गमानां
भुजादिकं रक्षतु मामकीनम् ॥ **99** ॥

सूतस्य वाहस्सुरनाथसूनोः
सूतस्य सूरस्य सहोदरो यः।
सूतस्य कस्याऽपि सुतस्य सूनुः
सूतस्स मे भातु मनोरथस्य ॥ **100** ॥

सरोजवासासदने वसन्तं
सरोषमाच्छिन्नसरीसृपौघम्।
सरोगमेतं सुखिनं विधातुं
सरोमहर्षः शरणं प्रपद्ये ॥ **101** ॥

श्रीनिवासकवितल्लजकॢप्तं
श्रीनिवासवसतेः पतगेन्दोः।
श्रीनिवासशतकं पठितं चेत्
श्रीनिवासशतकं प्रददाति ॥ **102** ॥

॥ इति क्षेमकारिशतकं समाप्तम् ॥